**संस्कृतवार्ता:**

**दिनाङ्क :-31.10.2025**

**प्रात: - 06:55**

**प्रधानमन्त्री एकता दिवस**

प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातस्य एकतानगरे स्थितस्य स्टैचू आफ् यूनिटी इत्यत्र सरदार वल्लभभाई पटेल वर्यस्य सार्धैकशततमे जन्मदिवसावधौ पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य राष्ट्रिय-एकता-दिवसस्यावसरे भव्य-समारोहे राष्ट्रस्य नेतृत्वं करिष्यति। अस्मिन् कार्यक्रमे भारतस्य ऐक्यं वैविध्यं च प्रदर्शयन्तः भव्य-पथ सञ्चलनानि, सांस्कृतिक-प्रदर्शनानि, श्रद्धाकुसुमानि च समर्पितानि भविष्यन्ति। राष्ट्रिय-एकता-दिवसः, प्रतिवर्षं अक्टूबर्-मासस्य एकत्रिंशत् दिनाङ्के, सरदार-वल्लभभाई-पटेलवर्यस्य जन्मदिवसस्य उपलक्षे आचर्यते। राष्ट्रिय-ऐक्यं, अखण्डतां, सुरक्षां च प्रोत्साहनाय अयं दिवसः समर्पितः अस्ति। एतत् नागरिकान् स्वराष्ट्रस्य संस्कृतेः च विषये अभिमानाय अपि प्रोत्साहयति। "विविधतायां एकता" इति विषयस्य अन्तर्गतं, दश -राज्यानां केन्द्रशासितप्रदेशानां च विनिर्मितानि प्रतिबिम्बानि, राष्ट्रियसुरक्षादलेन तथा राष्ट्रिय-आपद्प्रतिक्रिया-दलेन सह प्रदर्श्यन्ते। दिवसस्य स्मरणार्थं एकता कर्यक्रमानां आयोजनं द्वयोः चरणयोः भविष्यति। प्रथमस्य चरणस्य आयोजनम् अस्य अक्टोबर्-मासस्य एकत्रिंशत् दिनाङ्कादारभ्य नवम्बर्-मासस्य पञ्चविंशति दिनाङ्कपर्यन्तं भविष्यति, प्रत्येकस्य संसदीयक्षेत्रस्य अन्तर्गतं सर्वेषु मण्डलेषु मण्डल-स्तरीय-पदयात्रायाः आयोजनं भविष्यति। पदयात्रया सह, मण्डलेषु विविधाः विकासात्मक-कार्यक्रमाः यथा जलाशयेषु स्वच्छता-अभियानम्, "सरदार उपवन्" इति उपक्रमस्य अन्तर्गतं वृक्षारोपण-अभियानम्, महिला-कल्याण-शिबिरानि, योग-स्वास्थ्य-शिबिरानि, "वोकल् फ़ार् लोकल्" इति प्रचार-अभियानं च आरब्धं भविष्यति। द्वितीये चरणस्य आरम्भः नवम्बर मासस्य पञ्चविंशति-दिनाङ्कात् आरभ्य दिसम्बर-षट् दिनाङ्कपर्यन्तं भविष्यति, अस्य द्वितीय चरणस्य विस्तारः गुजरातराज्ये सरदार पटेलस्य जन्मस्थलात् द्विपञ्चाशदधिकैकशतं किलोमीटर्-परिमिते दूरे केवडिया-नगरस्य स्टैचू-आफ़्-यूनिटी-पर्यन्तं भविष्यति। अस्मिन् अवसरे, प्रशासनं "रन् फ़ार् यूनिटी" इति अभियानम् अपि आयोजयिष्यति, यस्मिन् प्रमुखनगरेषु राष्ट्रव्यापी-धावन्-प्रतियोगितापि आयोजिता भविष्यति।

**प्रधानमन्त्री द्विदिवसीय-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्यस्य द्विदिवसीय-यात्रायां ह्य: गुजरातराज्यं संप्राप्तवान्। सः ह्य: केवडिया-नगरस्य एकता-नगरे चत्वारिंशदधिकैकशत कोटिरूप्यकाणां आधारभूतसंरचनानां विकास-परियोजनानां उद्घाटनं शिलान्यासं च कृतवान्।

**आईपीआरडी - सम्मेलनम्**

**भारत-प्रशान्त-क्षेत्रीय-संवादस्य सप्तमस्य संस्करणस्य ह्यः नवदिल्ल्यां समापनम् अभवत्। "समग्र-समुद्रीय-सुरक्षायाः विकासस्य च प्रोत्साहनं क्षेत्रीय-क्षमता-निर्माणम् तथा क्षमता-सम्वर्धनम्" इत्येतस्मिन् विषये केन्द्रितस्य त्रि-दिवसीय-सम्मेलनस्य आयोजनं राष्ट्रिय-समुद्रीय-प्रतिष्ठानेन कृतम् आसीत्।**

**न्यायमूर्ती - सर्यकान्तः**

**न्यायामूर्तिः सूर्यकान्तः भारतस्य अग्रिमः मुख्यन्यायाधीशः भविष्यति। एकस्मिन् सामाजिकान्तर्जालीय-संदेशे विधि-न्याय-मन्त्रिणा अर्जुनराम-मेघवालेन तं अभिनन्दितम् उक्तम् च यत् राष्ट्रपतिः द्रौपदी-मुर्मुः न्यायाधीशं सूर्यकान्तवर्यं अग्रिमः मुख्यन्यायाधीशः नियुक्तवती। तस्य नियुक्तिः अग्रिममासस्य चतुर्विंशति दिनाङ्के भविष्यति। न्यायमूर्तिः सूर्यकान्तः त्रिपञ्चाशत्तमः मुख्यन्यायाधीशः भविष्यति। सः मुख्यन्यायाधीशस्य बी. आर्. गवायि इत्यस्य स्थाने नियुक्तः भविष्यति, यस्य कार्यकालः अग्रिमे मासे त्रयोविंशति दिनाङ्के समाप्तः भविष्यति।**

**शिवराज - एफपीओ**

**केन्द्रीयकृषि-कृषक-कल्याणमन्त्री शिवराजसिंह चौहानः अवदत् यत् अद्यावधि देशे दश सहस्राणि यावत् कृषक-उत्पादक-सङ्घटनानि (एफ्. पि. ओ.) इति स्थापितानि सन्ति, एफ्. पि. ओ. इत्येतेषां व्यापारः प्रायः शतकोटिरूप्यकाणि अभवत्।**

**क्रिकेट**

**आई.सी.सी.महिलानाम् एकदिवसीय-क्रिकेट-विश्व-चषक-स्पर्धायां गतरात्रौ नवी-मुम्बई नगरे द्वितीये उपान्त्यचक्रीय-द्वन्द्वे भारतीय महिला-दलेन ऑस्ट्रेलिया-दलं पंच स्तोभैः पराजितम्।**